लक्षणसम्बन्धाभावादिति चेत् तद्योग्यतयेति ब्रूमः। योग्यताप्रयोजकञ्च सामान्यशास्त्रविषयत्वम्। ततश्चात्यन्तवृद्धप्रपितामहावधिकाधस्तनानां षसां पुंसां प्रत्येकापेक्षया सप्तानामेकगोत्राणां स्वावधिपरतनानां सप्तानाञ्च सापिण्ड्यं पिण्डलेपयोर्दातृत्वभोक्तृत्वसम्बन्धादिति। स्त्रीणान्तु भर्तृसापिण्ड्येन सापिण्ड्यम् "प्रत्तानां भर्तृसापिण्ड्यमिति" वचनात्। नन्वेवं कन्यायाः कथं सपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम्। यथा "सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी"। अत्र कन्यानामूढानाम् "अप्रत्तानां त्रिपौरुषमिति" वशिष्ठवचनात्। तेन आत्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम्। अत एव कन्यायाः प्रपितामहभ्राता तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्यामरणजननयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति एवं तेषामपि जननमरणयोः कन्यानामिति शूलपाणिमहामहोपाध्यायः। यत्तु कूर्म्मपुराणम् "अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्। प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः" इति रत्नाकरधृतम्। तद्विवाहे पितृपक्षविषयम्। यथा विष्णुपुराणम् "सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम्। उद्वहेत द्विजो भार्य्यां न्यायेन विधिना नृप!" सप्तमीं पञ्चमीं हित्वेति शेषः। भर्तृसापिण्ड्यमित्यत्र साप्तपौरुषमित्यनुषज्यते। तेन भर्तृसमानसापिण्ड्यमित्यर्थः। शङ्खलिखितौ "सपिण्डता तु सर्व्वेषां गोत्रतः साप्तपौरुषी। पिण्डश्चोदकदानञ्च शौचाशौचं तदानुगम्"। गोत्रतः गोत्रैक्ये तेन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता। तान् सप्तपुरुषान् आ समन्तात् पिण्डादिकमनुगच्छतीति तदानुगम्। एतेन "सपिण्डता एकशरीरावयवान्वयेन भवति तथाहि पितुः शरीरावयवान्वयेन पित्रा सह एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन भ्रात्रादिभिरिति। एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्। तथाच गर्भोपनिषदि "एतत् षाट्कौषिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृतश्चेति" तत्र तत्रावयवान्वयप्रतिपादनात्। निर्वाप्यपिण्डान्वये तु सापिण्ड्ये भ्रातृपितृव्यादिसापिण्ड्यं न स्यात्।

अतिप्रसङ्गस्तु सप्तान्यतमत्वेन प्रयोगोपाधिना निरसनीयः। यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति, स्यादेतत् यदि मातामहादीनां मरणे "त्रिरात्रं स्यादशौचकम्" इत्यादिविशेषवचनं न स्यात्। यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिमतमपास्तं लेपभाजइत्यादि वाचनिकेऽर्थे सापिण्ड्ये एकशरीरावयवान्वयरूपस्य कपोलरचितार्थानवकाशात् निर्वाप्यपिण्डसम्बन्धेन भ्रात्रादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्व्वमुक्तत्वात् कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातत्वाच्च। रेतःशोणितपरिणामरूपत्वादपत्यशरीरस्य भवतु वा तथा पत्या सह पत्न्या एकशरीरारम्भकतायाः प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात् सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गाच्च मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च। भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथासप्तान्तर्गतत्वं तन्त्रं तथा "गोत्रतः साप्तपौरुषीति" वचनात् गोत्रैक्यमपि प्रागुक्तवचनात् कन्यायास्त्रीपौरुषम् ऊढायाश्च भर्त्तृसपिण्डनेन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थायां न क्षतिरिति अतएव सुमन्तुवचनाभिहितं यद्दशमपुरुषपर्य्यन्तमशौचं तत् सप्तमपुरुषाभ्यन्तराशौचान्यूनं त्रिरात्रं यथा "ब्राह्मणानामेकपिण्डस्वधानामादशमात्कर्म्मविच्छित्तिर्भवति आसप्तमात् स्वकर्थविच्छित्तिर्भवति आतृतीयात् स्वधाविच्छित्तिर्भवति" अन्यथा पिण्डशौचक्रियाद्युच्छेदात् ब्रह्महत्यातुल्यो भवति" अस्यार्थः। एका समाना पिण्डस्वधा येषां ते तथा यद्यैकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते इत्यत्रानुशब्देनानुशब्दयुक्तमन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु "ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इति तथा पिण्डस्वधाशब्देन पिण्डसम्बन्धिस्वधाशब्दयुक्तमन्त्रकरणकदेयजलं लक्षितम्। तथा च "ऊर्ज्जं वहन्तीरमृतं घृतं पयःकीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्" इत्यनेन पिण्डान् सिञ्चेदित्युक्तम्। ततश्च एकपिण्डस्वधानां समानोदकानामित्यर्थः। अतएव मनुः। "जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते"। विष्णुपुराणं "मातृपक्षस्य पिण्डेन सम्बद्धाः ये जलेन वा" मातृपक्षस्य मातामहपक्षस्य ये जलेन सम्बद्धाः समानोदका इति" श्राद्धविवेकेऽपि व्याख्यातम्। "असम्बन्धा भवेद् या तु